CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

058

बोधायनसूत्रम्

Script: Devanagari   Meterial: P.

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशायनमः ॥ अविघ्नमस्तु ॥ हरिः ॐ मू पशुनायक्ष्यमाणो भवति ॥ स
उपकल्पयते ॥ पोतुयुवान्परिधी ॥ न्गुग्गुलु सुगंधि तेजनं शकृ मूर्णास्तुकां यापे
त्व स्यांतराश्शृंगे द्वेरशने द्विगुणां च त्रिगुणां च द्वेव पाश्वपणी विशाखां चाविशाखां च हृ
दयशूलं कार्ष्मर्यमयान् परिधीनौदुंबरं मैत्रावरुणदंडं मुखेन संमितमिध्माबर्हिरि
ध्मं प्रणयनीयं प्लक्षशाखा मिडसूनुं यवान्यवमतीभ्यः सक्तून्सक्तु होमाय पृषदाज्या
यदधि हिरण्य मित्यथामावास्येन वा हविषेष्ट्वा नक्षत्रे वा गार्हपत्य आज्यं विलाप्योत्पू
य स्रुचि चतुर्गृहीतं गृहीत्वा षड्ढोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे य
जमाने स्वाहेत्य परं चतुर्गृहीतं गृहीत्वा सुपाहुतिं जुहोत्युरु विष्णो विक्रमस्वो रु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षयायनःकृधि ॥ घृतंघृतयानेपिबप्रप्रयज्ञपतिंतिरस्वाहे ॥ त्यपरंवतुगृत्तंगृ
१ हीत्वा यथाच त्वाज्यस्थालीं सस्रुवांबर्हिर्हिरण्यमुदपात्रं व्राजयंतितक्षाणं सप
रशुमाहेहियजमानेति पूर्वयाद्वारोपनिष्क्रम्यतांदिशंयंतियत्रास्ययूपस्यछोभवति
यत्रवावेत्स्यन्मन्यते सयःसमेभूम्यैस्वाद्योनेरूढोवहुपर्णोबहुशाखोप्रतिशुष्काग्रःप्रत्य
ङुपनतस्तमुपतिष्ठतेऽत्यन्यानगान्नान्यानुपागामर्वाक्त्वापरैरविदंपरोवरैस्तंत्वाजु
षेवैष्णवंदेवयज्यायाइत्यथैनमाज्येनानक्तिदेवस्त्वासवितामध्वानक्त्वित्युर्ध्वाग्रं
बर्हिरन्तर्धायत्वोषधेत्रायस्वैनमिति ॥ स्वधितिनातिर्यंचंप्रहरति ॥ स्वधितेमैनं
हिंसीरिति ॥ यःप्रथमःशकलःपरापतति ॥ तंप्रज्ञातंनिदधाति तमपरिभिंद

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्नेनक्षसंगं दृश्चातिशोचं वोदंचंवाग्र यांतमनुमंत्रयतेदिव मग्रेणमालेखी॥ रं
तरिक्षंमध्येनमाहिंसीः पृथिव्यासंभवे॥ त्यथाव्रश्चनेहिरण्यं निधायसंपरि
स्तीर्यभिजुहोतिवनस्पते शतवल्शोविरोहस्वाहेति॥ सहस्रवल्शाविवयं रुहे
मे॥ त्यात्मानंप्रत्यभिमृशेतेन्वंगं शारवाः प्रसूदयतियं त्वायं स्वधिति
स्तेतिजानः॥ प्रणिनायमहते सौभगायेति पंचारत्निं तस्मैव्रश्चेदित्येषब्राह्मणव
तामवमस्तंपरिव्यंगपरमं प्रादेशावमंचषालस्य कालेपरिवासवत्यछिन्नो
रायः सुवीर इति॥ यत्सरंभवति॥ तस्यचरंगुवं चषालायप्रछेदयति॥ तंचतुरश्रिं
वाष्टाश्रिंवाकृत्वा वाहरत्या वाहारयत्यो॥ ह्यनिस्तिष्टत्य॥ वतक्षणानामेवस्वरुं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कुरुते ॥ थास्येषापूर्वेद्युरेव ॥ पाशुबंधिकीवेदिर्विमिताभवति ॥ दशपदापश्चात्तिरश्ची
२ ॥ द्वादशपदाप्राच्य ॥ ष्टापदापुरस्तात्तिरश्चीतांपरिस्तीर्य ॥ स्तंबयजुर्हरति ॥ इदंमे
वर्चासिद्धं ॥ पौरोडाशिकं ॥ त्रिर्यजुषातूष्णींचतुर्थंपूर्वपरिग्राहंपरिगृह्णाति ॥ करं
णंजपत्यु ॥ द्धंरक्षुद्धतादाग्नीध्रस्त्रिर्हरति ॥ यदाग्नीध्रस्त्रिर्हरत्य ॥ थयाचति ॥ स्फ्य
मुदपात्रंबर्हिः शम्यामित्येतत्समादायाहेहियजमानेत्युत्तरेण वेदिंद्वयोर्वात्रिषुवाप्र
क्रमेषुस्फ्येनोद्धत्यावोक्ष्य शम्ययाचात्वालंपरिमिमीते वितायनीमेसीतिपुरस्तादु
दीचीनकुंबयांतरतः स्फ्येनालिखत्यवत्तान्माव्यथितमित्युत्तरतः प्राचीनकुंब
यांतरतः स्फ्येनालिखत्यवतान्मानाथितमितिपश्चादुदीचीनकुंबयांतरतः स्फ्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नालिखत्यवत्तान्माव्यथितमित्युत्तरतः प्राचीनकुंबयांत्तरतः स्फ्येनालिखत्यथ
चात्वाले बर्हिर्निधायतस्मिन् स्फ्येनप्रहरति विदेरग्निर्नभोनामाग्ने अंगिरोयोस्यां
पृथिव्यामसीत्यादत्त आयुषानाम्नेहीति हृत्वोत्तरवेद्यांनिवपति यत्तेनाधृष्टंनाम
यज्ञियंतेनत्वादधइति द्वितीयंप्रहरति विदेरग्निर्नभोनामाग्ने अंगिरोयो द्वितीय
स्यांपृथिव्यामसीत्यादत्त आयुषानाम्नेहि तिहृत्वोत्तरवेद्यांनिवपतियत्तेनाधृष्टं
नामयज्ञियं तेनत्वादधइति तृतीयंप्रहरति विदेरग्निर्नभोनामाग्ने अंगिरोय
स्तृतीयस्यां पृथिव्यामसीत्यादत्त आयुषानाम्नेहीतिहृत्वोत्तरवेद्यांनिवपति ॥
यत्तेनाधृष्टन्नामयज्ञियंतेनत्वादधइति तूष्णींचतुर्थंप्रहरति सहबर्हिषाथाध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॰र्युः स्फ्येन चात्वालात्पुरीषमुद्धृत्य थाग्नीध्रमाहाग्नीदित्त स्त्रिर्हरेति तत्तस्त्रिरा
२ ग्नीध्रो हरति यदाग्नीध्रस्त्रिर्हरत्यथाध्वर्युरुत्तरवेद्यै पुरीषꣳ संप्रयोति सिँ रसिम
हीषीरसीति प्रथयत्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति स्फ्येन सꣳहंति ध्रु
वासीत्यथैनामद्भिरवोक्षति देवेभ्यः शुंधस्वेति देवेभ्यः शुंभस्वेति सिकता सिर
नुप्रविहरति तां प्रादेशमात्रीं चतुरस्रां निष्ठापशम्यया परिमिमीत उत्तरनाभि
मुत्साद्याथैनां ग्राति ध्याघाभ्रिमादत्ते देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहु
भ्यां पूष्णो हस्ताभ्यामाददे इत्यादायाभिमंत्रयते ऽभ्रिरसि नारिरसीति तया यूपावटं परिलिखति
यथा नवेद्यर्धꣳ स्याद्बहिर्वेद्यर्धं परिलिखतꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्नीवा अपिव्र्जनामि योस्मान्द्वेष्टि यंच वयं द्विष्मः इदमस्य ग्नीवा अपिकृंतामीत्यथा
ग्नीध्रमाहाग्नीदेहीमं यूपावटं र वनोपरसंमित्ते प्राक्पुरीषमुद्वपतात्चतुरंगुलेनोपर
मति खनतादितित २ सरवनति वारवानयति वा यावदेवात्राध्वर्युश्चेष्टति तावदेव
प्रतिप्रस्थाता भ्यादधातीध्मं प्रणयनीयमुपोयमनीः कल्पयंति चात्वालादा सनेंद्र
घोषवतीः प्रोक्षणीरध्वर्युरापदत्ते परिकर्मिणे पंच गृहीतमाज्यं प्रयच्छति ब्रह्मणिसं
भाराभवंत्यथ संप्रैषमाहाग्नये प्रणीयमानायानुब्रूह्यग्नीदेकस्फ्यायानु संदे
हीति त्रिरुक्तायामुद्यच्छंते होतुर्वंशं यंत्युत्तरेण वेदिं प्रतिपद्यंते धारयंत्येतमग्निम
ग्निमथाध्वर्युरिंद्रघोषवतीभिः प्रोक्षणीभिरुत्तरवेदिं प्रोक्षति २ इंद्रघोषस्त्वा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च सुभिः पुरस्तात्पात्विति पुरस्तान्मनोजवास्त्वा पितृभिर्दक्षिणतः पात्विमिदक्षि
४ णतः प्रचेतास्त्वा रुद्रैः पश्चात्पात्विति पश्चाद्विश्वकर्मा त्वादित्यैरुत्तरतः पात्वुत्ते
त्तरतोथ यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत उत्तरवेद्यै निनयति यदेवतत्र
क्रूरं तत्तेन शमयतीति ब्राह्मणमथैनं हिरण्यमंतर्धायास्रुच्यापंचग
हीतेन व्याघारयति सिंहीरसि सपत्नसाही स्वाहेति दक्षिणेंसे सि
ंहीरसि सुप्रजावनिः स्वाहेत्युत्तरस्यां श्रोण्यां सिंहीरसि रायस्पोष
वनिः स्वाहेति दक्षिणस्यां श्रोण्यां सिंहीरस्यादित्यवनिः स्वाहेत्युत्तर
ंसे सिंहीरस्यावह देवां देवयते यजमानाय स्वाहेति मध्ये भूतेभ्यस्त्वे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्तिस्कचमुद्रूह्लात्यथपौतुद्रवान्परिधीन्परिदधातिविश्वायुरसिप
थिवींदृ॰हेतिमध्यमंध्रुवक्षिदस्यंतरिक्षंदृ॰हेतिदक्षिणमच्युत
क्षिदसिदिवंदृ॰हेत्युत्तरमथातिशिष्टान्त्संभारान्निवपति गुग्गुलु
सुगंधितेऊनॢ शुक्लामूर्णास्तुकामग्नेर्भस्मास्यग्नेःपुरीषमसीत्यथैनां
त्स॰स्त्रावेणाभिघारयत्यथप्रदक्षिणमावृत्तेध्मं प्रतिष्ठापयतियज्ञपते
तिष्ठसुमन्तोसुश्रोवाआत्वावसूनिपुरुधाविशंतु॥ दीर्घमायुर्यजमाना
यक्रुण्वन्नथामृतेनजरितारमङ्धीत्यथैनंविसृस्याहुतिषाहकृत्वा
ध्वराहुतिभिरुपजुहोत्यग्निर्यज्ञंनयतुप्रजानन्मैनंयज्ञहनोविदन्॥देवे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भ्यः प्रक्रूलायज्ञं प्रप्र यज्ञपतिं तिर स्वाहा ॥ वायुर्यज्ञं नयतु प्रजानन्नेमेन यज्ञहनो वि
५ दन्॥ देवेभ्यः प्रक्रूलायज्ञं प्रप्र यज्ञपतिं तिर स्वाहा ॥ सूर्यो यज्ञं नयतु प्रजान
न्नेमेनं यज्ञहनो विदन्॥ देवेभ्यः प्रक्रूलायज्ञं प्रप्र यज्ञपतिं तिर स्वाहा ॥ यज्ञो यज्ञं
नयतु प्रजानन्नेमेनं यज्ञहनो विदन्॥ देवेभ्यः प्रक्रूलायज्ञं प्रप्र यज्ञपतिं तिर स्वा
हेत्यथैतां यजमान एव स्वयं जुहोत्यग्निरन्नादोन्नपतिरन्नस्येशे स मेन्नं ददा
तु स्वाहा ॥ वायुः प्राणदाः प्राणस्येशे स मे प्राणंदतुदा स्वाहा । आदित्यो भू
रिदा भूयिष्ठानां पशूनामीशे स मे भूयिष्ठान्पशून्ददातु स्वाहेत्यग्निवत्युत्तरं
परिग्राहं परिगृह्य यायुपित्वा तिर्यंचं ० स्फ्यं ० स्तब्ध्वा संप्रेषमाह प्रोक्षणी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रासादयेध्मा बर्हिरुपसादय स्रुवं॒ स्वधितिं॒ स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रह
णीं पत्नीं॒ सन्नह्याज्येन च दध्ना चोदेहीत्याहृत्ता सुप्रोक्षणी पूदस्य स्फ्यं मार्जयित्वेध्मा
बर्हिरुपसाद्य प्रदक्षिणमादत्य प्रत्यङ्गाद्रुत्य स्रुवं च स्वधितिं च स्रुवश्च संमार्ष्टि तूष्णीं पृ
षदाज्यग्रहणीं पत्नीं॒ सन्नह्यत्याज्येन च दध्ना चोदेत्याज्यं च प्रोक्षणीश्चोत्पूय प्रसि
द्धमाज्यानि गृहीत्वा पृषदाज्यग्रहण्यामुपस्तृणीते महीनां पयोसीति विश्वेषां दे
वानां तनूरिति द्वितीयं बर्हिषी अंतर्धाय दध्यानयत्यृध्यासमद्य पृषतीनां ग्र
हं पृषतीनां ग्रहोसीत्यपोद्धृत्य बर्हिषी अथाभिघारयति विष्णोर्हृदयमसीत्ये
कमिषविष्णुस्त्वानुविचक्रम इति द्वितीयं। २। अथ प्रोक्षणीभिरुपोत्तिष्ठती

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ध्मं प्रोक्षति बर्हिः प्रोक्षति बर्हिरासन्नं प्रोक्ष्योपनिनीय पुरस्तात्प्रस्तरं गृह्णाति पं
६ चविधं बर्हिस्तीर्त्वा प्रस्तरपाणिः प्राङभिसृप्य काष्मर्यमयान्परिधीन्परि
दधात्यूर्ध्वे समिधावादधाति विधृती तिरश्ची सादयति विधृत्योः प्रस्तरं प्र
स्तरे जुहू बर्हिषी तरा एता अ सदन्निति समभिमृश्य प्रदक्षिणमावृत्य
प्रत्यङाद्रुत्य याचति यवमतीः प्रोक्षणी बर्हिस्तंबमान्यस्थालीं स्रुक्स्रु
वाऽ स्वरु रशनां मैत्रावरुणदंडं यूपशकलं हिरण्यमुदपात्रमित्येतत्सं
निधाय यूपं प्रक्षालयति यत्ते शिक्वः परावधीत्तक्षा हस्तेन वाश्या॥ आप
स्तेतद्धनस्पाते रपवुंदंतु शुंधनीरिति यूपरपप्रक्षालितः प्रपन्नः संपन्न

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

च षालः प्राग वटादुपश्नेते तमुत्तरेणाह वनीयंतिष्ठन्परां वंप्रोक्षति पृथिव्यै
त्वांतरिक्षाय त्वा दिवेत्वेत्य वटेपो वनयति शुंधतांलोकः पितृषदन इति यवा
न्त्र स्कंदयति यवोसि यवयास्मद्द्वेषो यवयारातीरिति बर्हि स्तंबं व्यति
षज्यावस्तृणाति पितृणा ꣳ सदनमसीत्यथेन द्धिरण्यमंतर्धाय स्रुवाहु
त्याभिजुहोति पितृभ्यः स्वाहेति यूपशकलमुपास्यति स्वावेशो स्यग्रे गो
नेतृणां वनस्पतिरधित्वास्थास्यति तस्य वित्तादित्यथादत्ते आज्यस्थाली
ꣳ स स्रुवाꣳ स्वरुं रशनां मे त्रावरुणदंडमुदपात्रमित्येतत्समादायाहे हि य
जमानेत्युक्ती पत्न्यग्रेण यूपं परीत्य दक्षिणत उदङ्मुखास्तिष्ठंति पूर्व एवा
ध्वर्युरपरो यजमानो परापत्न्यथ प्रवृह्य चषालं यूपस्याग्रमनक्ति देव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्यासविलामध्वानक्ति त्यं तरतश्चबाह्यतश्च स्वभ्यक्तं कृत्वाचषाले प्रतिमुंचति
सुपिप्पलाभ्य स्त्वौषधीभ्य इत्यथ स्रुवेणाग्निष्टामधिमभिघारयन्नाह यू
पायाज्यमानायानुब्रूहीत्यंतमनक्तांतमेवयजमानंतेजमानक्ति नो
परमनक्ति पत्न्युपरमनक्ति सर्वतः परिमृशत्यपरिवर्गमेवास्मिं
स्तेजो दधातीति ब्राह्मणमुच्छ्रयन्नाहोच्छ्रीयमाणायानुब्रूहीत्युच्छ्रयत्युद्दिवꣳ
स्तभानांतरिक्षं पृणपृथिवीमुपरेणदृꣳहेत्यथैनं वैष्णवीभ्यामृग्भ्यां क
ल्पयति तेते धामानि विष्णोः कर्माणि पश्यतेति द्वाभ्यां सयत्राग्निष्टाममभिमाह
वनीयेन संपादयति नध्रुवस्य चषालं परेक्षयति तद्विष्णोः परमं पदꣳ स
दा पश्यंति सूरयः ॥ दिवीवचक्षुराततमित्यथैनं प्रदक्षिणं पुरीषेण पर्यूह

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तिब्रह्मवनिंत्वाक्षत्रवनिंꣳसुप्रजावनिꣳरायस्पोषवनिंपर्यूहामीतिमैत्रा
वरुणदंडेनसꣳहंतिब्रह्मदृꣳहक्षत्रंदृꣳहप्रजांदृꣳहरायस्पोषंदृꣳहेत्य
न्यूनमनतिरिक्तंपरिन्यस्योदपात्रमुपनिनीयाथैनांत्रिगुणाꣳरशनांत्रिःसं
भुज्यमध्यमेनगुणेननाभिदघ्नेपरिव्ययन्नाहपरिवीयमाणायानुब्रूहीति
त्रिःप्रदक्षिणंपरिव्ययतिपरिवीरसिपरित्वादेवीर्विशोव्ययंतांपरीमꣳ
यस्पोषोयजमानंमनुष्याइत्युपांतेव्यतिषजत्यांतंप्रवेष्टयत्यणिमत्तिस्थवि
मत्सवधत्यथोत्तरेणाग्निष्ठामभिमध्यमेगुणेस्वरुमवगूहत्यंतरिक्षस्यत्वा
सानावगूहामीतिस्वर्वंतंयूपमुत्सृजति। ४ ।अथैतपशुंपल्पूलितमं
त्तरेणचात्वालोत्करोप्रपाद्याग्रेणयूपंपुरस्तात्प्रत्यङ्मुखमुपस्थापयतितमि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

बौ०प०

८ पे त्वेति बर्हिषी आदायोपाकरोत्युपवीरस्युपो देवां दैवीर्विशः प्रागुर्वा। न्हीरु
शिजो बृहस्पते धारया वसूनि हव्या ते स्वदंतां देव त्वष्टर्वसुरण्व रेवती रमध्वं प्र
जापतेर्जायमाना इमं पशुं पशुपते ते अद्येंद्राग्निभ्यां त्वाजुष्टमुपाकरोमीति यद्दे
वत्यो वाभयति प्रज्ञाते बर्हिषी निधायाधिमंथनं शकलं निदधात्यग्नेर्जनित्र
मसीति वृषणावन्वंचो वृषणो स्थ इत्यथारणी आदत्त उर्वश्यस्यायुरसि पुरू
रवा इत्यथैने आज्यस्थाल्यां समनक्ति घृतेनाक्ते वृषणं दधाथामित्यथ
प्रजातीर्वाचयति गायत्रं छंदोनुप्रजायस्व त्रैष्टुभं छंदोनुप्रजायस्व जागतं
छंदोनुप्रजायस्वेत्यथाहाग्नये मथ्यमानायानुब्रूहीति जातमाह जातायानु
ब्रूहीति प्रहरन्नाह प्रक्रियमाणायानुब्रूहीति प्रहरति भवतं नः समनसाविति

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रहत्याभिजुहोत्यग्नावग्निश्चरतिप्रविष्टइत्यथरशनामादत्ते देवस्यत्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामाददइति तयाऽप्ययापशुमभिदधाति दक्षि
णमर्द्धशीर्षमृतस्यत्वा देवहविः पाशेनारभइति द्विगुणायेचांतौसंदधाति धर्षामा
नुषानिति नियुनक्त्यथैनमद्भिः प्रोक्षत्यद्भ्यस्त्वौषधीभ्यइंद्राग्नैत्वाजुष्टंप्रोक्षा भ्या
मीति यद्देवत्योवाभवतिपाययत्यपांपेरुरसीति स्वात्तं चित्सदेवꣳहव्यमापोदेवीस्व
दतैनमित्युपरिष्टात्प्रोक्ष्याधस्तादुपोक्षतिसर्वतएवैनंमेध्यंकरोतीतिब्राह्मणमुदू
ह्यप्रोक्षणीधानं। ५। अथेध्मात्समिधमाददान आहाग्नयेसमिध्यमानाया
नुब्रूहीत्यभ्यादधातीध्मंपरिसमिधꣳशिनष्टिवेदेनोपवाजयत्यनूक्तासुसा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मिध्मेनीपुरस्कचेणाघारमाघारयतिसंमष्टेस्कभ्यामुत्तरमथासः स्पर्शयन्स्क
२ चाबुदङ्ः त्यान्कम्यजुह्वापभृःसमनक्ति संतेप्राणोवायुनागछ नामितिकल्लोटे
संयजत्रैरंगानीतिकुकुदिसंयज्ञपतिराशिषेतिदक्षिणस्याः श्रोण्यामथयथाय
तनः स्कचोसादयित्वाप्रवरंवृणीतप्रसिद्धः होतारंवृणीतेथाश्रावयत्योश्रा
वयास्कश्रौषण्णिमावरुणोप्रशास्तारोप्रशास्त्रादित्यसोमानुषइतिमैत्राव
रुणस्यनामगृह्णात्यथाश्रावयतियद्यत्रात्याश्रावयत्योश्रावयास्कश्रौष
व्ळग्निर्देवीनांविशांपुरएतायंयज्ञमानोमनुष्याणांतयोरस्कृत्तिगार्हपत्यंदी
दृयपछन्तः हिमाद्वायूराधाःसीत्संप्रेयानावसंरचोनोतन्वइतिसीदतिहोता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रसवमाकांक्षत्ति प्रसूतः स्रुचावादायात्याक्रम्याश्राव्याह समिध्यः प्रेष्ये
ति वषट्कृते जुहोति प्रेष्य प्रेष्येति चतुर्थाष्टमयोः समानयमाने ष्टमे सर्व
ंसमानयते परिस्वाहाकृतीभ्यः संस्रावं शिनष्टि दशप्रयाजानि
ष्ट्वोदङ्ङत्याक्रम्य स्वरुं वशां संपाति वेजुह्वामंक्त्वा ताभ्यां पशुंसमनक्ति
घृतेनाक्तो पशुं त्वा येथामिति प्रयच्छति शासमवगूहति स्वरुमथ यथायतन
ंस्रुचौ सादयित्वाह पर्यग्नये क्रियमाणायानुब्रूहीत्यथैष आग्नीध्र आ
हवनीयादुल्मुकमादायांतरेण चात्वालोत्करावुत्तरेण शामित्रदेशमग्ने
ण पशुंजघनेन स्रुच इत्येवं त्रिः प्रदक्षिणपर्येत्यथानुपरिसरणमपा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रतिख्यानिजुहोतिप्रजानंतःप्रतिगृह्णंतिपूर्वेयेषामीशेपशुपतिःपशूनांये
१० बध्यमानमनुबध्यमानायआरण्याःपरीवोविश्वरूपाःप्रमुंचमानाभुव
नस्यरेतइतिनिधायाग्नीध्रउल्मुकंयथेतंत्रिःपुनःप्रतिपर्येत्यथोल्मुक
प्रथमाःप्रतिपद्यंतेन्वकशामितापशुनापशुमध्वर्युर्वपाश्रपणीभ्याम
न्वारभतेवपाश्रपणीयजमानोयाश्राव्यसंप्रेष्यत्युपप्रेष्यहोतर्हव्या
देवेभ्यइत्यथैनंपशुमंतरेणचात्वालोत्करावुदंचंनीयमानमनुमंत्रय
तेनानाप्राणोयजमानस्यपशुनारेवतीर्यज्ञपतिंप्रियधाविशतेतिद्वा
भ्यांसयत्रैतदाग्नीध्रउल्मुकंनिदधातितदग्रेणवोत्तरेणवापशावेनि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हन्यमानाय बर्हिरुपास्यति पृथिव्याः संपृचः पाहीति तदेतं पशुं प्रतीची
नशिरसमुदीचीनपादं निघ्नंत्यपरुध्य वंतं मायुष्संज्ञपयतेत्युक्ते तेने
वयथेतमेत्य पृषदाज्यावकाशा आसत इह प्रजा विश्वरूपा रमंताम
स्मिन्यज्ञे विश्वविदो घृताचीः। अग्निं कुलायमभिसंवसाना अस्मा
अवंतु पयसा घृतेनेति संज्ञप्तं प्राहुर्जुहोति संज्ञप्तमाहुतिं यत्पशुर्मायु
मकृतेत्यथाभ्येति शमितारउपेतनेति पाशात्पशुं प्रमुच्यमानमनुमंत्रयते
दितिः पाशं प्रमुमोक्तेतमित्यथ विशाखयोपसंज्येमां दिशं निरस्यत्यराती
यंतमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुंचामि पाशमित्यथ प्रतिप्रस्थाता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पत्नीमुदानयत्युदकमंडलुमुपाध्याथैनामादित्यमुदीक्षयति नमस्तआतानेत्यथैना
११ मंतरेणचात्वालोत्कराउदङ्ङुपनिष्क्रमय्य प्राचीमुदानयत्वाचयत्यनर्वा प्रेहि घृतस्य
कुल्यामनुसह प्रजयासह रायस्पोषेणेत्यागतामध्वर्युरस्रुवा वाचयत्यापो देवीः शु
द्धायुवः शुद्धायूयं देवा ऊढ्वं शुद्धावयं परिविष्टाः परिवेष्टारो वोभूयास्मेति सानु
पूर्व्यं पशोः प्राणानाप्याययति वाक्त आप्यायतामिति वाचं प्राणस्तआप्यायतामि
ति प्राणं चक्षुस्त आप्यायतामिति चक्षुः श्रोत्रं त आप्यायतामिति श्रोत्रं मेतानेव पुनः
सं मृशति यात्ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थितं तत्त आप्यायतां
तत्त एतेन शुंधतामिति नाभिं स्तआप्यायतामिति नाभिं पायुस्तआप्यायतामिति

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पायुꣳ संस्रग्ध्यपदः प्रक्षालयति शुद्धाश्चरित्राः शमद्भ्यः शमोषधीभ्यः शंपृथि
व्या इति शमहोभ्यामित्यतिशिष्टाद्दक्षिणतोनुपृष्ठं निनयति न यन्ति पल्लमुत्तानं प
शुं पर्यस्यति तस्य दक्षिणस्य पार्श्वे स्यविष्टत्तमनुप्राचीनाग्रं बर्हिर्निदधात्योषधे
त्रायस्वैनमिति स्वधितिं तिर्यंचं निदधाति स्वधिते मैनꣳ हिꣳसीरिति छिनत्ति
बर्हिर्विलचक्रणत्यथैतस्यैन बर्हिषो णिमस्तं चतेस्थ विमदुभयतो। लोहितेनां
त्केमां दिशं निरस्यति रक्षसां भागोसीदमहꣳ रक्षोधमं तमोन यामि योस्मा
न्द्वेष्टि यं च वयं द्विष्म इदमेनमधमं तमोन यामीत्यथापउपस्पृश्य वरीय आच्छा येषे
त्वेति वपामुत्खिदति तया वपाश्रपाणी प्रोर्णोति घृतेन द्यावापृथिवी प्रोर्णुवाथा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मित्यविशाखयोपन्त्याधस्तात्परिवासयत्यछिन्नो रायः सुवीर इत्यथैनां प्रद
१२ क्षिणमावृत्याद्भिरभ्युक्ष्य शामित्रे प्रतितपत्यथोल्मुकं प्रथमाः प्रतिपद्यंतेऽद्भि।
अन्वगध्वर्युर्वपयाश्वपा श्रपणी पुनरन्वारभंते यजमान एत्युर्वंतरिक्षमन्वि
हीत्येत्याहवनीयस्यांतिमेषंगारे ष्ठुवपायेप्रतितप्यमानो येबर्हिषोग्रमुपा
स्यति वायो वीहि स्तोकानामित्यथैनामंतरेण यूपं चाहवनीयं चोपातिहृत्यतां
दक्षिणत उदङ्मुखः प्रतिप्रस्थाता श्रवत्यथैनां स्रुवाहुत्याभिजुहोति त्वा
मुते दधिरे हव्यवाहमित्यथाह स्तोकेभ्योऽनुब्रूहीति परिहितासु स्तोकीया
सु श्रुतायां वपायां जुहूपभृतावादायात्याक्रम्याश्राव्याह स्वाहाकृतीभ्यः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रेष्येति वषट्कृते जुहोत्यथोदङ्ङत्याक्रम्य स ऽ स्रावेण पृषदाज्यमभिघार्य व
पामभिघारयत्यथाग्नये सोमायेत्याज्यभागाभ्यां चरत्यथोपस्तीर्य द्विः स्रुवेण व
पा ऽ समवत्तुं पन्नाहेंद्राग्निभ्यां छागस्य वपाया मेदसोवदीयमानस्यानुब्रूही
ति द्विरभिघारयत्यत्याक्रम्याश्राव्याहेंद्राग्निभ्यां छागस्य वपां मेदः प्रस्थितं
प्रेष्येत्यथ पुरस्तात्स्वाहाकृति ऽ स्रुवाहुतिं जुहोति स्वाहा देवेभ्य इति वष
ट्कृते वपां जुहोति जातवेदो वपया गच्छ देवान्त्व ऽ हि होता प्रथमो बभूथ।
घृतेन त्वं तनुवो वर्धयस्व स्वाहाकृत ऽ हविरदंतु देवा स्वाहेत्यथोपरिष्टा
त्स्वाहाकृति ऽ स्रुवाहुतिं जुहोति देवेभ्यः स्वाहेत्यत्र वपाश्रपणी अनुप्रह

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रति प्राचीं विशाखां प्रतीचीमविशाखां स्वाहा धूनभसं मारुतं गच्छत मित्यथै
१२ नेस॰ स्रावेणाभिजुहोत्यथोदङ् त्याक्रम्य यथायतन॰ स्रुचौ सादयित्वा स
मुक्षम्य चात्वाले मार्जयंते वहयंति पत्नी॰ वहयंति होतारं वहयंति ब्रह्माण॰
वहयंति प्रतिप्रस्थातारं वहयंति प्रशास्तारं वहयंत्याग्नीध्रमिदमापः प्रवहतावद्यं
चमलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽभीरुणं। निर्मा मुंचामि श
पथान्निर्मा वरुणादुत। निर्मा यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात्रेहि
यजमानेति दथो मनुष्यकिल्बिषादित्यथोजलिना पउपहंति सुमित्रान आ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प ओषधयः संक्षितितां दिशं निरुक्षति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै
भूया सूर्यस्मान्द्वेष्टि यं च वयं द्विष्म इत्यथाप उपस्पृश्य यथा यतनमुपविशन्ति
८ अथ संप्रैषमाहाग्नीत्पशुपुरोडाशं निर्वप प्रतिप्रस्थातः पशुं विशाधी
ति निर्वपत्येष आग्नीध्र ऐंद्राग्नमेकादशकपालमथ प्रतिप्रस्थाता पशुं विशा
स्ति शामित्र हृदयं जिह्वां वक्षस्तानि सार्द्धं कुरुतात्तनिमं मतस्नेतानि सार्द्धं
सव्यं दोरकचरं कुरुतान्नानापार्श्वे अववधत्ताद्दक्षिणां श्रोणिमध्युद्धिं कुरुता
द्दक्षिणं दोः सव्यां श्रोणिमणिमद्गुदस्य तानि त्र्यंगानि कुरुताद्वनिष्ठुं च जाघ
नीं चावधत्ताद्गुदं यूः कुरुतात्त्रिः पशुं प्रच्यावयतात्त्रिः प्रच्युतस्य पशोर्हृद

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यमुत्तमं कुर्यादिति श्रुते पशोपशुपुरोडाशं याचति तमुपस्तीर्णाभिघारि
१४ तमुद्वास्यांतर्वेद्यासादयत्यथ जुहूपभृतोरुपस्तरणान आहेंद्राग्निभ्यां पु
रोडाशस्यावदीयमानस्यानुब्रू हीति पूर्वार्धादवदायापरार्धादवद्यत्यभि
घारयति प्रत्यनक्त्यथोपभृति स्विष्टकृते सकृदुत्तरार्धादवद्यति द्विरभि
घारयति न प्रत्यनक्त्यत्याक्रम्याश्राव्याहेंद्राग्निभ्यां पुरोडाशं प्रस्थितं प्रे
ष्यति वषट्कृते जुहोत्यथ समावपमान आहाग्नये ब्रूहीत्याश्राव्याहा
ग्नये प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धेतिहायपूर्वा आहुतीर्जुहोत्यथो
दङ् त्याक्रम्यपथा यतन ऽ स्रुचौ सादयित्वा प्राशित्रमवदायेडामव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

घ्न्युपहूतायामिडायामग्नीध आदधाति षडवत्तं प्राश्नंति यार्जयंते थ सं
प्रेषमाहाग्नीदुत्तरं बर्हिरुपसादय प्रति प्रस्थाता पशोः संवदस्वेत्यथैष आग्नी
ध्रः प्लक्षशाखायामिडसूनुमुपगूहति तदुत्तरं बर्हिर्निवस्य थ प्रतिप्रस्था ता
पृषदाज्यं विहत्य जुह्वां समानीयांतरेण चात्वालोत्करावुदङुपनिष्क्रम्य
पृच्छति शृतं हवीः शमितरिति शमितैष उत्तरतो हृदयशूलं धारयद्यं
स्तिष्ठति स शृतमित्याह तं तथैव द्वितीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्र
त्याह तं तथैव तृतीयमुत्क्रम्य पृच्छति तं तथैवेतरः प्रत्याहाथ शमितु हृद
यशूलमादाय तेन हृदयमुपतृणत्त्वं शमित्रे संप्रदाय पृषदाज्येन हृदय

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

माभिघारयति संते मनसा मनः संप्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतव
१५ त्स्वाहेति वियूः कृत्वाहरेते त्युत्कै तेनैव यथेतमेत्य चत्तस्रः पूपस्तरणी
ते जुहूपभृतोरिडाधाने यास्मिंश्चव साहोमं ग्रहीष्यन् भवत्याहरंति
तं पशुमंतरेण चात्वालोत्करावंतरेण यूपं चाहवनीयं चोपातिहृत्यंतं
दक्षिणतः पंचहोत्रा सादयत्येतेनैव यूराहरंत्येतेनैवेडसूनुमथ प्लक्ष
शाखायाऽ हृदयं निधाय स्वधितिनातस्याग्रेवद्यन्नाह ८ मनो
तायै हविषोवदीयमानस्यानुब्रूहीति हृदयस्याग्रेद्विरवद्यत्यथ जिह्वा
याऽथ वक्षसोऽथ तनिम्नोऽथ वृक्कयोरथ सव्यस्य दोष्णोऽथ दक्षिण

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्य पार्श्वस्याथ सव्यस्याथ दक्षिणायै श्रोणेरध्युध्ये त्रेधं गुदं कृत्वाणिम
त्स्विष्टकृते निदधाति स्थविमदुपयड्भ्यो मध्यं द्वेधं कृत्वा जुह्वामवदधा
त्यथ त्वक्यमेदो यूषन्नवधाय तेन जुहूं प्रोर्णोति यूष्णोपसिंचत्यभिघारय
त्यथोपभृति स्विष्टकृते सर्वेषां त्र्यंगाणां सकृत्सकृत्समवद्यति सकृद्दक्षि
णस्य दोष्णः पिशितं प्राच्छिद्यावदधाति सकृत्सव्यायै श्रोणेरणिमदुदस्या
थ त्वक्यमेदो यूषन्नवधाय तेनोपभृतं प्रोर्णोति यूष्णोपसिंचत्यथ द्विरभिघा
रयत्यथ हृदयं जिह्वां वक्षस्तनिमतस्नो वनिष्टुमिति पात्र्यां समवधा
य यूष्णोपसिंचत्यभिघारयत्यथ कंसे वा चमसे वा वसाहोमं गृह्णाति यू

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ष्ठोपसिंचत्यभिघारयत्यथपशोरवदानानि संमृशत्यैंद्रः प्राणो अंगेअंगे
१६ निदेध्यदैंद्रोपानो अंगेअंगे विबोभुवद्देव त्वष्टर्भूरि ते सꣳसमेतु वि
षुरूपा यत्सलक्ष्माणो भवथ देवत्रा यंतमवसे सखायोनु त्वा मातापि
तरो मदंत्वित्यथ दक्षिणेन पार्श्वे वसाहोमं प्रयौति कुंबलः श्रीरस्यग्नि
स्त्वा श्रीणातापः समरिणन्वातस्य त्वाध्रज्यै पूष्णोरꣳह्या अपामोषधी
नाꣳरोहिष्या इति संमृशत्यस्य पशोः प्रतीचीं जाघनीꣳहरंति प्रतिप
रिहरंति पशुमथ जुहूपभृतावाददान आहैंद्राग्निभ्यां छागस्य हवि
षोनुब्रूहीत्यथात्याक्रम्याश्राव्याहैंद्राग्निभ्यां छागस्य हविः प्रस्थितं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रेष्येति प्रति प्रस्थातेषउ त्तरतो यसाहोमं धारयंति ष्ट ति सोर्धर्चेयाज्या
ये वसाहोमं जुहोति घृतं घृतपावानः पिबत वसां वसापावानः पिबतां
तरिक्षस्य हविरसि स्वाहा त्वांतरिक्षाय स्वाहेति वषट्कृते हविर्जुहो
त्येतस्य होमम नु प्रति प्रस्थात्ताव सा होमो इ केण दिशो जुहोति दिशः प्रदि
श आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः स्वाहेत्यथ प्रदक्षि
ण मावृत्य पृषदाज्या स्रुवेणोपघ्नं नाह वनस्यत येनु ब्रूहीत्या श्राव्या
हवनस्यतये प्रेष्येति वषट्कृत उत्तरार्धपूर्वार्धेति हाय पूर्वाआहुतीर्जु
होत्यथो रद्रुत्याक्रम्य यथायतनं स्रुवौ सादयित्वा होत्र इडामुपोद्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

घ्नंतेमेदसउपहूतायामिडांयामग्नीध्रआदधातिषडवत्तमर्धंवनिष्ठुमथा
र्धंवनिष्ठुंमेदस्त्वत्साभ्रंतिमार्जयंतेथाहब्रह्मणेवक्षःपरिहरेतितद्ध
ब्रह्माप्रतिगृह्णाति ९ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतःप्रजा
वंतोअशीमहीत्यथसंप्रेष्यमाहाग्नीदौपयजानंगारानाहरोपयष्टरुपसी
दब्रह्मन्प्रस्थास्यामःसमिधमाधायाग्नीदग्नीन्सकृत्सकृत्संमृड्ढी
त्याहरंत्येतान्च्छागिन्नाग्नीदौपयजानंगारांस्तानग्रेणहोतारंनिवपत्यु
पसीदत्युपयष्टागुदत्तनीयेनाथाध्वर्युःपृषदाज्यंविहरत्यजुह्वांसमा
नीयात्याक्रम्याश्राव्याहदेवेभ्यःप्रेष्येतिवषट्कृतेजुहोतिप्रेष्यप्रेष्ये

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्येवमेवोपयष्टोपयजति गुदस्य प्रच्छेद २ समुद्रं गच्छ स्वाहेत्येतैरेका
दशभिरग्निं वैश्वानरं गच्छ स्वाहेति सर्वमंत्रतो प्रहरत्यथ बर्हिषि ह
स्तौ निमार्ष्ट्यं ३ घ स्तोषधीभ्यो मनो मे हार्दि यच्छेत्यथास्य धूममन्वी
क्षते तत नूं त्वचं पुत्रं नप्तारमसीयेत्येकादशानूयाजानिष्ट्वा दक्षु स्वाक्
म्यजुह्वा ३ स्वरुमवधाय पुरस्तात्प्रत्यङ् तिष्ठं जुहोति दिवं ते धूमो
गच्छत्वंतरिक्षमर्चिः पृथिवीं भस्मना पृणस्व स्वाहेत्यथ यथायत
न ४ स्रुचौ सादयित्वा वाजवतीभ्यां ५ स्रुचौ व्यूहति शंयुना प्रस्त
र परिधीन् प्रकीर्य संप्रस्राव्य स्रुचौ विमुच्य जाघंन्या पत्नीः संयाज

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यंत्याज्यस्यैव सोमं च त्वष्टारं   च यजत्युत्तानाये जाघन्ये देवा
१८ नां पत्नीर्यजाति नीच्याग्निं गृहपतिमुत्तानाये जाघन्ये होत्र इडामवद्य
ति नीच्याग्नीध्रे षडवत्तं प्राश्नीतो मार्जयेतेथ स्रुचि चतुर्गृहीतं गृहीत्वा
ऽपसलैः पर्यावृत्यान्वाहार्यपचने प्रायश्चित्तं जुहोति न फलीकरण
होमेन चरत्यथ प्राडेरप ध्रुवामाप्याय्य त्रीणि समिष्टयजूंषि जुहोति
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहेति स्रुवेणैव द्वितीयमेष
ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीरः स्वाहेति स्रुचा तृतीयं देवा गातु
विदो गातुं वित्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञं स्वाहा वा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चिस्वाहावातेधास्वाहेत्युदूहतिस्रुचमथयाचतिस्फ्यमुदपात्रंचहृदयशू
लमित्येतत्समादायाहेहियजमानेत्यन्वग्यजमानोनुव्रजेत्पत्न्यंतरेणचा
त्वालोत्करादुदङ्पनिष्क्रम्याग्रेणयूपंचस्फ्येनोद्धत्यावोक्ष्यस्रुचस्यचार्द्र
स्यचसंधौहृदयशूलमुद्वासयति १० स्रुगासितमा[illegible]ञ्चोचयोस्मान्द्वे
ष्टियंचवयंद्विष्मइत्यथाद्भिर्मार्जयंतेधाम्नोधाम्नोराजन्नितोवरुणनो
मुंच॥ यदापोअघ्न्यावरुणेतिशपामहेततोवरुणनोमुंचेत्यथाप्रतीक्ष
मायंतिवरुणस्यांतर्हितैनपथेसमिधःकुर्वंतएधोस्येधिषीमहीत्येत्या
हवनीयेभ्यादधातिसमिदसितेजोसितेजोमयिधेहीत्यथाहवनीयमु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पतिष्ठंतअपोअन्वचारिषꣳरसेसमसृक्ष्महि ॥ पयस्वाꣳअग्नआगमं
१९ तंमासꣳसृजवर्चसेत्यथोपयजिकेग्नौबर्हिरुपोषतियत्कुसीदमप्रती
त्तंमयियेनमैयैस्यबक्लिनाचरामि ॥ इहैवसन्निरवदयेतदेतत्तदग्नेअ
नृणोभवामीत्यथांजलिनोपस्तीर्णाभिघारितान्सक्तून्प्रदाव्येजुहोतिवि
श्वलोपोविश्वदावस्यत्वासंजुहोमिस्वाहेतिहस्तोप्रध्वसयतेऽग्धादे
कोहुतादेकः समसनादेकस्तेनः रुण्वंतुभेषजꣳसदः सहोवरेण्य
मितिद्वितीयंजुहोति यान्यपामित्यान्यप्रतीत्तान्यस्मियमस्यबल्लिना
चरामि। इहैवसंतः प्रतित्तद्यातयामोज्जीवाजीवेभ्योनिहराम एनस्या

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हेतिहस्तौप्रध्वंसयते ग्धादेकोहुत्तादेकः समसनादेकस्तेनः कृण्वंतुभे
षजꣳसदः सहोवरेण्यमिति तृतीयंजुहोत्यनृणाअस्मिन्ननृणाः परस्मि
ꣳस्तृतीयेलोके अनृणाः स्याम॥ येदेवयानाउतपितृयाणाः सर्वान्पथो
अनृणाआक्षीयेमस्वाहेति हस्तौप्रध्वंसयतेग्धादेकोहुतादेकः समसनादे
कस्तेनः कृण्वंतु भेषजꣳसदः सहोवरेण्यमित्यथदेवताउपतिष्ठंते यन्नो
नभसापुरइत्यग्निं सत्वन्नोनभसस्पतइतिवायुंदेवसꣳस्पानेत्यादित्यमथ
यूपमुपतिष्ठंत आशासानः सुवीर्यꣳरायस्पोषꣳस्वश्वियं॥ बृहस्पति
नारायास्वगाकृत्तोमह्यं यजमानायतिष्ठेत्यथपूर्वाग्निꣳशकलेसमारोप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्ययंते योनिर्ऋत्विय इति तं मध्यमेनाग्नावपिसृजत्याजुह्वान उद्बुध्य
२० स्वाग्न इति द्वाभ्यामथ मध्यममग्निमुपसमाधाय मध्यमेग्नौ पूर्णाहुतिंजु
होति सप्त ते अग्ने समिधः सप्तजिह्वा इति पूर्णाहुत्तौ वरं ददाति धेनूर्वरं
यानडुद्वरं वा दद्यादिति ह स्माह बौधायनः संतिष्ठते पशुबंधः संतिष्ठते प
शुबंधः ११ इति बौधायनसूत्रे पशुबंधः समाप्तः ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri